# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा -दिसम्बर, २०१८

| कक्षा -शास्त्रीतृतीयवर्षम् (SEM-5) | प्रश्नपत्रम् – ५ | गुणाः - ७० |
|---|---|---|
| विषयः - फलितज्यौतिषम् | (C.C.- 3.5.9. Old & New ) | |
| दिनाङ्कः - ०८/१२/२०१८ | लघुजातकम् /पञ्चस्वराः | समयः -१०.०० तः ०१.०० |

### प्रथमान्वितिः

**प्रश्नः १ अधोलिखितेभ्यः कयोश्चित् द्वयोः व्याख्यां करोतु । ( १० )**

(अ) इष्टदेवं नमस्कृत्य गोपालं कुलदैवतम् ।
श्रीप्रजापतिदासेन क्रियते ग्रन्थसंग्रहः ॥
नवग्रहान्नमस्कृत्य देवीं सरस्वतीं तथा ।
प्रणिपत्यगुरुं किञ्चिज्ज्योतिः शास्त्रं निरूप्यते ॥

(ब) ऊर्ध्वं रेखा त्रयं लेख्यं तिर्यग्रेखात्रयं तथा । वेधास्तिर्यक क्रमाज्ज्ञेयोद्वाभ्यां द्वाभ्यां परस्परम् ॥
खड्रेखास्तु समालिख्य पताकी वेधनिर्णये । रव्यादिग्रहदानेन जन्मारिष्टं विधीयते ॥

(क) उदितं भ्रमितं भ्रान्तं सन्ध्याऽस्तं तदनन्तरम् । जन्मकर्म तथाऽऽधानं पिण्डं छिद्रं ततः परम् ॥
पञ्चबालादिकावस्तथा नामाद्यक्षरतस्था । आद्योबालः कुमारश्च युवावृद्धो मृतोपि वा ॥

**प्रश्नः २ अधोलिखितयोः कस्यचित् एकस्य उपरि निबन्धं लिखतु । ( १० )**

(अ) अन्तर्दशासाधनम् । (ब)केतुपताकीचक्रजनितवर्षेशफलकथनम् ।

### द्वितीयान्वितिः

**प्रश्नः ३ अधोलिखितेभ्यः कयोश्चित् द्वयोः व्याख्यां करोतु । ( १० )**

(अ) अकारे मेषसिंहालि इ स्त्रीमिथुनकर्कटाः ।
उ स्वरे चापमीनौ च एकारेव तुला वृषौ ॥
ओ स्वरे मृगकुम्भौ च राशीशात् वार निश्चयः ।
स्वराधः स्थापयेत् खेटान् राशैर्योयस्य नायकः ॥

(ब) लग्ने भाष्करपुत्रः निधने च चन्द्रमा यदि ।
तृतीयस्थो यदा जीवः स याति यममन्दिरम् ॥

(क) अष्टमस्थो यदा भानुः शशिशुक्रावलोकितः ।
रिपुगेहे विशेषेण काणयोगो भवेद्ध्रुवम् ॥

**प्रश्नः ४ अधोलिखितयोः कस्यचित् एकस्य उपरि निबन्धं लिखतु । ( १० )**

(अ) अरिष्टयोगकथनम् । (ब) तिथ्यादिस्थापनकथनम् ।

### तृतीयान्वितिः

**प्रश्नः ५ अधोलिखितेभ्यः कयोश्चित् द्वयोः व्याख्यां करोतु । ( १० )**

(अ) राजारविः शशधरश्च बुधः कुमारः । सेनापतिः क्षितिसुतः सचिवौ सितेज्यौ

भृत्यस्तथा तरणिजः सबलाग्रहाश्च कुर्वन्तिजन्मसमये निजमेवरूपम् ॥

(ब) योगेस्थानं गतवति बलिनश्चन्द्रे स्वं वा तनुगृहमथवा ।
पापैर्दृष्टे बलवति मरणं वर्षस्यान्तः किलमुनिगदितम् ॥

(क) राश्यंशकला गुणिता द्वादशनवभिर्ग्रहस्य भगणेभ्यः ।
द्वादशहृतावशेषेऽब्दमासदिननाडिकाक्रमशः ॥

**प्रश्नः ६ अधोलिखितयोरेकस्योपरि निबन्धं लिखतु ।** **( १० )**

(१) आयुर्दायाध्यायः । (२) ग्रहबलाध्यायः ।

## चतुर्थान्वितिः

**प्रश्नः ७ अधोलिखितेषु केषाञ्चित् दशप्रश्नानामतिलघूत्तराणि लिखन्तु ।** **( १० )**

(१) पञ्चस्वराग्रन्थस्य लेखकः कः ?

(२) पञ्चस्वराग्रन्थे कति अध्यायाः सन्ति ?

(३) प्रजापतिदासस्य कुलदेवः कः ?

(४) दैवज्ञप्रजापतिदासः कस्मिन् कुलोत्पन्नः ?

(५) त्रिपताकीचक्रे कर्कधनु-एवं मीनस्य वेधः भवति, न वा ?

(६) यदा चन्द्रो भाष्करोऽपि अरिगेहस्थितः भवेत् तदा फलं किम् ?

(७) अष्टमस्थाने पापग्रहः तथा सौम्यः द्वादशेस्थितः तदा फलं किम् ?

(८) जन्मलग्नात् सप्तमे सूर्यः शनिः एवं एकादशे गुरुः शुक्रश्च भवति चेत् फलं किम् ?

(९) लघुजातकग्रन्थस्य लेखकः कः ?

(१०) लघुजातकप्रथमाध्यायस्य नाम किम् ?

(११) पादौ कस्य राशेः स्थानम् ?

(१२) कालपुरुषस्य अङ्गविभागसंख्या का ?

(१३) कालपुरुषाङ्गे वृषराशेः स्थानं कुत्र भवति ?

(१४) भौमः हिंसकः भवति न वा ?

(१५) विषमराशयः के ?

--००--